दिनाङ्क :- 18.10.2025 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत्, कृत्स्ने हि विश्वस्मिन् अद्य भारतं विश्वसनीयत्वेन , उत्तरदायित्वेन , स्थितिस्थापकसहभागित्वेन च दृश्यते इति। गतदिने सायङ्काले नवदेहली-नगरे एकया वार्ता-संस्थया आयोजिते विश्व-शिखरसम्मेलने भाषणं कुर्वन्, श्रीमोदी अवदत् यत्, इलेक्ट्रानिक्स्- इत्यत: फार्मास्यूटिकल्स्-पर्यन्तं, आटोमोबैल्- इत्यत: मोबाइल इत्यस्य निर्माणपर्यन्तं, भारते निवेशस्य तरङ्गः प्रवहति। सः सद्यः एव कृतस्य ई. एफ़्. टी. ए. व्यापारसमन्वयस्य उदाहरणं दत्तवान्, यस्य अन्तर्गतं यूरोपीय-देशाः भारते निवेशं कृतवन्तः।

### गृहमन्त्रालय

गृहमन्त्रालयेन गतमासस्य चतुर्विंशतिः दिनाङ्के लेह्-नगरे गभीर-विधि-व्यवस्थायाः स्थितिः, आरक्षकाणां कार्यम्, चतुर्णां व्यक्तिनां मृत्युः इत्येतेषां परिस्थतीनां विषये न्यायिक अन्वेषणस्य आदेशः दत्तः अस्ति। न्यायिक-अन्वेषणं सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशेन न्यायमूर्तिना बी. एस्. चौहान् इत्यनेन क्रियते।

### बिहार विधानसभा मतदान

बिहारविधानसभानिर्वाचनस्य प्रथमस्य चरणस्य नामाङ्कनप्रक्रिया ह्यः समाप्ता। अस्मिन् चरणे अष्टादश मण्डलेषु एकविंशत्यधिकैकशत विधानसभाक्षेत्राणां कृते नवेम्बर मासस्य षड् दिनाङ्के मतदानं भविष्यति। अद्य नामाङ्कनपत्राणां परीक्षणं भविष्यति, अभ्यर्थिनः सोमवासरपर्यन्तं नामाङ्कनं प्रत्याहर्तुं अर्हन्ति। अत्रान्तरे, राज्ये विधानसभा-निर्वाचनस्य निर्वाचन-प्रचारः तीव्रः अभवत्।

भाजपा-दलस्य वरिष्ठनेता केन्द्रीय-गृह-मन्त्री अमितशाहः बिहारस्य सारण-जनपदे दलस्य निर्वाचन-प्रचारम् आरब्धवान्, तेन तरैया-विधायकाय जनक-सिङ्घाय, सहैव अमनोर-प्रत्याशिने कृष्ण-कुमार्-मन्टू इत्यस्मै च समर्थनं सङ्गृहीतम्। सारण-जनपदस्य तरैया-नगरे जनसभां सम्बोधयन् श्रीशाहः विगतदशकद्वये राज्ये विधि-व्यवस्थायाः पुनः स्थापनार्थं मुख्यमन्त्री नितीश-कुमारस्य प्रशंसाम् अकरोत्। सः गतैकादशवर्षेषु प्रधानमन्त्रिणः श्रीमोदिनः योगदानम् अधोरेखितवान् तथैव सः सबलं प्रावोचत् यत् एन. डी. ए. पक्षः नितीश-कुमारस्य नेतृत्वे निर्वाचने युध्यति। सः सिन्दूराभियानम् आतङ्कं विरुध्य प्रमुखम् कार्याचरणमासीत् इत्यपि वर्णितवान्। श्री शाह: बिहारस्य मुख्यमन्त्रिणा नितीश कुमारेण सह पटना-नगरे तस्य निवासस्थाने मेलनं कृतवान्। बिहार-विधानसभायाः निर्वाचनं नवम्बरमासस्य षड् दिनाङ्के, नवम्बरमासस्य एकादश-दिनाङ्के च द्वयोः चरणयोः भविष्यति। परिणामस्य घोषणा नवम्बरमासस्य चतुर्दश- दिनाङ्के भविष्यति।

### वायु-गुणवत्ता

वायु-गुणवत्ता-प्रबन्धन-आयोगः (सी. ए. क्यू. एम्.) ह्यः आगामिनि शिशिरर्तौ वायु-प्रदूषणस्य नियन्त्रणार्थं सज्जतां समीक्षितवान्। आयोगस्य पंचविशतितम-सभायां, ग्रेडेड्-रेस्पान्स्-आक्शन्-प्लान् (जी.आर्.ए.पी.) इत्यस्य कार्यान्वयनस्य समीक्षा कृता अपि च वाहन-उत्सर्जनस्य, औद्योगिक-उत्सर्जनस्य समीक्षा कृता।

**बैडमिण्टन्-क्रीडायाम्**

बैडमिण्टन्-क्रीडायाम् भारतीय-पुरुषयुगलः सात्विकसाईराजः रंकीरेड्डीः चिराग् शेट्टी च डेनमार्क्-ओपन-क्रीडायाः प्रागोपान्त्यचक्रं प्रति प्रविष्टवन्तौ। भारतीययुगलः गतरात्रौ उपान्त्यचक्रे इण्डोनेशियादेशस्य मुहम्मद् रियान् अर्दियांटो तथा रह्मत् हिदायत् इत्येतयोः अनसीड्-युग्मं पराजयत्। अद्य प्रागोपान्त्यक्रीडायां ते जापानदेशस्य ताकुरो होकी तथा युगो कोबयाशी इत्येतौ सम्मुखीकरिष्यतः। परन्तु लक्ष्यसेनः स्पर्धातः पराजितः अभवत्।

।। इति वार्ता:।।